श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्र्यशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्र्यशीतितमः सर्गः ॥

## सीतावधं श्रुत्वा शोकेन श्रीरामस्य मूर्च्छा तमाश्वासयतो लक्ष्मणस्य पौरुषार्थमुद्यमश्च

राघवश्चापि विपुलं तं राक्षसवनौकसाम्।
श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह ॥ **6.83.1** ॥

सौम्य नूनं हनुमता कृतं कर्म सुदुष्करम्।
श्रूयते च यथा भीमः सुमहानायुधस्वनः ॥ **6.83.2** ॥

तद् गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः।
क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ॥ **6.83.3** ॥

ऋक्षराजस्तथेत्युक्त्वा स्वेनानीकेन संवृतः।
आगच्छत् पश्चिमं द्वारं हनूमान् यत्र वानरः ॥ **6.83.4** ॥

अथायान्तं हनूमन्तं ददर्शर्क्षपतिस्तदा।
वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम् ॥ **6.83.5** ॥

दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतम्।
नीलमेघनिभं भीमं सन्निवार्य न्यवर्तत ॥ **6.83.6** ॥

स तेन सह सैन्येन सन्निकर्षं महायशाः।
शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत् ॥ **6.83.7** ॥

समरे युध्यमानानामस्माकं प्रेक्षतां च सः।
जघान रुदतीं सीतामिन्द्रजिद् रावणात्मजः॥ **6.83.8** ॥

उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिन्दम।
तदहं भवतो वृत्तं विज्ञापयितुमागतः॥ **6.83.9** ॥

तस्य तद् वचनं श्रुत्वा राघवः शोकमूर्च्छितः।
निपपात तदा भूमौ छिन्नमूल इव द्रुमः॥ **6.83.10** ॥

तं भूमौ देवसङ्काशं पतितं दृश्य राघवम्।
अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः॥ **6.83.11** ॥

आसिञ्चन् सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः।
प्रदहन्तमसंहार्यं सहसाग्निमिवोत्थितम्॥ **6.83.12** ॥

तं लक्ष्मणोऽथ बाहुभ्यां परिष्वज्य सुदुःखितः।
उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम्॥ **6.83.13** ॥

शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम्।
अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः॥ **6.83.14** ॥

भूतानां स्थावराणां च जङ्गमानां च दर्शनम्।
यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः॥ **6.83.15** ॥

यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम्।
नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते॥ **6.83.16** ॥

यद्यधर्मो भवेद् भूतो रावणो नरकं व्रजेत्।
भवांश्च धर्मसंयुक्तो नैव व्यसनमाप्नुयात्॥ **6.83.17** ॥

तस्य च व्यसनाभावाद् व्यसनं चागते त्वयि।
धर्मो भवत्यधर्मश्च परस्परविरोधिनौ॥ **6.83.18** ॥

धर्मेणोपलभेद् धर्ममधर्मं चाप्यधर्मतः।
यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः॥ **6.83.19** ॥

न धर्मेण वियुज्येरन्नाधर्मरुचयो जनाः।
धर्मेणाचरतां तेषां तथा धर्मफलं भवेत्॥ **6.83.20** ॥

यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः।
क्लिश्यन्ते धर्मशीलाश्च तस्मादेतौ निरर्थकौ॥ **6.83.21** ॥

वध्यन्ते पापकर्माणो यद्यधर्मेण राघव।
वधकर्महतोऽधर्मः स हतः कं वधिष्यति॥ **6.83.22** ॥

अथवा विहितेनायं हन्यते हन्ति चापरम्।
विधिः स लिप्यते तेन न स पापेन कर्मणा॥ **6.83.23** ॥

अदृष्टप्रतिकारेण अव्यक्तेनासता सता।
कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्षण॥ **6.83.24** ॥

यदि सत् स्यात् सतां मुख्य नासत् स्यात् तव किञ्चन।
त्वया यदीदृशं प्राप्तं तस्मात् तन्नोपपद्यते॥ **6.83.25** ॥

अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते।
दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः॥ **6.83.26** ॥

बलस्य यदि चेद् धर्मो गुणभूतः पराक्रमैः।
धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले॥ **6.83.27** ॥

अथ चेत् सत्यवचनं धर्मः किल परन्तप।
अनृतं त्वय्यकरणे किं न बद्धस्त्वया विना॥ **6.83.28** ॥

यदि धर्मो भवेद् भूत अधर्मो वा परन्तप।
न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः॥ **6.83.29** ॥

अधर्मसंश्रितो धर्मो विनाशयति राघव।
सर्वमेतद् यथाकामं काकुत्स्थ कुरुते नरः॥ **6.83.30** ॥

मम चेदं मतं तात धर्मोऽयमिति राघव।
धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा॥ **6.83.31** ॥

अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः।
क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः॥ **6.83.32** ॥

अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः।
विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा॥ **6.83.33** ॥

सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः।
पापमाचरते कर्तुं तदा दोषः प्रवर्तते॥ **6.83.34** ॥

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः॥ **6.83.35** ॥

यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान्।
यस्यार्थाः स महाभागो यस्यार्थाः स गुणाधिकः॥ **6.83.36** ॥

अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया।
राज्यमुत्सृजता धीर येन बुद्धिस्त्वया कृता॥ **6.83.37** ॥

यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम्।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता॥ **6.83.38** ॥

हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः।
अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप॥ **6.83.39** ॥

येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम्।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः॥ **6.83.40** ॥

त्वयि प्रव्रजिते वीर गुरोश्च वचने स्थिते।
रक्षसापहृता भार्या प्राणैः प्रियतरा तव॥ **6.83.41**॥

तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम्।
कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव॥ **6.83.42**॥

उत्तिष्ठ नरशार्दूल दीर्घबाहो धृतव्रत।
किमात्मानं महात्मानमात्मानं नावबुध्यसे॥ **6.83.43**॥

अयमनघ तवोदितः प्रियार्थं
    जनकसुतानिधनं निरीक्ष्य रुष्टः।
सरथगजहयां सराक्षसेन्द्रां
    भृशमिषुभिर्विनिपातयामि लङ्काम्॥ **6.83.44**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः॥